# Ashwalayana gruhya sutra bhashyam.pdf/३५१



**Exported from Wikisource on १३ दिसंबरमासः २०२४**

एतत् पृष्ठम् अपरिष्कृतम् अस्ति

३२२ आश्वलायन गृह्यसूत्रभाष्यम् ग्रहा गावो नरेन्द्राश्च ब्राह्मणाश्च विशेषतः । पूजिताः प्रतिपूज्यन्ते निर्दहन्त्यपमानिताः ॥ इति ॥ २७ ॥ अथातो ग्रहाणां प्रमाणम्--- द्वादशाङ्गुलोऽर्को भवेत् सोमश्च द्विगुणः स्मृतः । कुजः स्याच्चतुरङ्गुलस्तदर्धं तु बुधः स्मृतः ।। षडङ्गुलो भवेज्जीवो भार्गवस्तु नवाङ्गुलः । सौरिः स्याच्चतुरङ्गुलो राहुः पञ्च च विंशतिः । केतुः पञ्च च विंशतिस्ततश्चार्धाङ्गुलः परः ॥ तिलतण्डुलमिश्रं वा अजाक्षीरं तु शोणितम् । कर्णनासागृहीतं स्यादेतच्चित्रोदनं स्मृतम् ।। मध्ये तु भास्करं विद्याच्छशिनं पूर्वदक्षिणे । लोहितं दक्षिणे विद्याद् बुधं पूर्वोत्तरेण तु ।। उत्तरेण गुरुं विद्यात् पूर्वेणैव तु भार्गवम् । पश्चिमेन शनि विद्याद्राहुं दक्षिणपश्चिमे । पश्चिमोत्तरतः केतुं ग्रहाणां विधिरुत्तमः ॥ इति ॥ २८ ॥ अथातो वारुणविधिः । वापीकूपतडागयज्ञं व्याख्यास्यामः । पुण्ये तिथिकरणे शुभे नक्षत्रे प्राचीं दिशमास्थाय प्राक्प्रवण उदक्प्रवणे वोदकसमीपेऽग्निमुपसमाधाय वारुणं चरुं श्रपयित्वा तस्य पुरस्ताच्चतस्र आज्याहुतीर्जुहुयात् । 'समुद्रज्येष्ठाः' इति प्रत्यृचम् । ततो हविषाष्टाभिर्जुहुयात् 'तत् त्वा यामि ब्रह्मणा वन्दमानः' इति पञ्च, 'त्वं नो अग्ने वरुणस्य विद्वान्' इति द्वे,

# About this digital edition

This e-book comes from the online library Wikisource[1]. This multilingual digital library, built by volunteers, is committed to developing a free accessible collection of publications of every kind: novels, poems, magazines, letters...

We distribute our books for free, starting from works not copyrighted or published under a free license. You are free to use our e-books for any purpose (including commercial exploitation), under the terms of the Creative Commons Attribution-ShareAlike 3.0 Unported[2] license or, at your choice, those of the GNU FDL[3].

Wikisource is constantly looking for new members. During the realization of this book, it's possible that we made some errors. You can report them at this page[4].

The following users contributed to this book:

- Srkris

---

1. ↑ https://wikisource.org

2. ↑ https://www.creativecommons.org/licenses/by-sa/3.0
3. ↑ https://www.gnu.org/copyleft/fdl.html
4. ↑ https://wikisource.org/wiki/Wikisource:Scriptorium